prācī prajñā

Search this site

मुखपुटम्

प्राचीप्रज्ञा
मुखपुटम्
अस्मद्विषये
उपदेष्टृमण्डली
सम्पादकमण्डली
सम्पादकीयम्
शास्त्रमञ्जूषा
संस्कृतवार्ता
काव्यधारा
प्रतिस्पन्दाः
अन्तर्जालप्रवाहाः
संस्कृतविश्वविद्यालयाः
संस्कृतान्तर्जालसम्प□ ाः
संस्कृतसंवर्धनसंस्थाः
संस्कृतपत्रि□ ाः
संस्कृतविद्वांसः
सञ्चिका
परिचर्चा
सूचनाः
सम्पर्कः
सदस्यता

मुखपुटम् > वार्ताः >

**संस्कृतवार्ता**

---

ISSN 2348 – 8417

## संस्कृतवार्ताः

अङ्कः – तृतीयः (चतुर्थवर्षः), चैत्रमासः, विक्रमसंवत् – 2073

Vol – III (Year – IV) March – 2017

‘भारतीयविद्या : वैश्विकपरिप्रेक्ष्ये’ इति विषये अन्ताराष्ट्रिया संगोष्ठी

आयोजिका – “वाईडर एसोसिएशन फॉर वैदिक स्टडीज” इति संस्था, भारतम्

दिनाङ्कः – 23 फरवरी, 2017

स्थानम् – भारतीयविद्याभवनम्, दिल्ली, भारतम्

वार्तासौजन्यम् - डॉ॰ अपर्णाधीरः , दिल्ली, भारतम्



वेव्ससंस्थया (वाईडर एसोसिएशन फॉर वैदिक स्टडीज) देहलीस्थभारतीयविद्याभवने 23 फरवरी 2017तमे दिनाङ्के एका संगोष्ठी आयोजिता आसीत् । सर्वप्रथमं डॉ॰ सुप्रियासंजूमहोदया सरस्वतीवन्दनां प्रस्तुतवती। संस्थासंस्थापकप्रो.भूदेवमहोदयस्य अध्यक्षतायां संगोष्ठ्या

आरम्भः अभवत् । संगोष्ठ्यामस्यां त्रयः आमन्त्रिताः वक्तारः आसन् । बेलजीयमदेशात् "तुलनात्मकधर्म"स्य लेखकः डॉ० कोन्रार्डइल्स्टमहोदयः तथा च अमेरिकादेशात् समागतः अध्यापकः डॉ० मनोहरशिण्डेमहोदयः 'धर्म सभ्यता फाउंडेशन' इति संस्थायाः च अध्यक्षः आस्ताम् । इतोऽपि देहलीविश्वविद्यालयस्य राष्ट्रियपाण्डुलिपिमिशनसंस्थायाः पूर्वाध्यक्षा प्रो०दीप्तित्रिपाठिवर्या आसीत् ।




अवसरेऽस्मिन् भारतीयविद्याभवनस्य अध्यक्षः श्री अशोकवर्यः मुख्यातिथिरूपेण तथा च 'संस्कारम्' इत्यस्य सम्पादकः श्री ईश्वरदयालकंसलवर्यः विशिष्टातिथिरूपेण आस्ताम् । वेव्जसंस्थायाः संयुक्तसचिवः डॉ० अपर्णाधीरवर्या कार्यक्रमस्य सञ्चालनं तथा च अतिथीनां स्वागतमकरोत् ।



डॉ० कोन्रार्डइल्स्टमहोदयेन 'धर्म की परिभाषा एवं सीमाओं' इति विषयमधिकृत्य स्वविचारान् प्रस्तूयोक्तं "वेदेषु प्रतिपादितं ऋतमेव धर्मस्य संकल्पनायां परिवर्तितमस्तीति अपि च तत्त्वमिदं अद्यापि भारतीयचिन्तने प्रमुखं वर्तते" इति । एवमेव कर्मस्यावधारणापि भारतीयविद्यायाम् अद्वितीयास्तीत्युक्तमाचार्यैः ।

डॉ० मनोहरशिण्डेवर्यः अमेरिकादेशे भारतीयाध्ययनस्य विषयान् प्रास्तौत् अपि च तेनोक्तं "पश्चिमिविद्यालयेषु ते किम् पाठ्यते तद् ज्ञातव्य"मिति । पश्चिमिदेशेषु भारतीयविचाराः यथार्थरूपेण नोपस्थाप्यन्ते इति महोदयस्य कथनमिदमासीत् ।

संस्कृतवार्ता - prācī prajñā



चीनदेशे अतिथिप्राध्यापिकारूपेण कार्यं कृतवत्या प्रो० दीप्तित्रिपाठीमहोदयया 'चीनदेशे भारतीयाध्ययनस्य रूपरेखा' इति विषयमधिकृत्य स्वविचाराः प्रस्तुताः । चीनदेशीयाः द्विसहस्राद् वर्षेभ्यः भारतीयविद्यायां रुचिं धारयन्ति तथा च चीनदेशे बौद्धधर्मस्य बहुकार्यमभवत् बहु ग्रन्थाः च अनुदिताः इति सा उक्तवती । श्री अशोकप्रधानवर्यः भारतीयविद्याभवनस्य देहलीस्थकेन्द्रे भारतीयविद्यायाः अनुसन्धानकेन्द्रस्य च संचालनस्य परिचयं दत्तवान् । युवानः भारतीयविद्यायाः अध्ययनाय जागरूका भवेयुरिति श्रीकंसलमहोदयेनोक्तम् । संस्थायाः संस्थापकेन प्रो० भूदेववर्येण अध्यक्षीयभाषणं कृतम् ।

सभायाम् वहवः विद्वांसः श्रोतृरूपेणोपस्थिता आसन्, तेषु –डॉ.शशितिवारी, डॉ. सरोजचावला, डॉ. सती शंकर, डॉ.सरोगुलाटी, श्री वाई.के. वाधवा, डॉ. आर. एस. कौशलः, डॉ.धर्मा, डॉरञ्जितबेहरा, डॉ.ललिताजुनेजा, डॉ.नीना मिश्रा, डॉ.शकुन्तलापुंजानी, श्रीतिलक अरोढ़ा, डॉ.रजनीसरीन, डॉ. धनञ्जमणित्रिपाठी, डॉ.आशालतापाण्डेयः, इत्यादयः । वेव्जसंस्थायाः उपाध्यक्षेण प्रो०लल्लनप्रसादवर्येण संगोष्ठ्यां उपस्थितनां सर्वेषां अतिथीनां सभासदां च कृते धन्यवादः ज्ञापितः । संगोष्ठ्याः समापनं श्रीप्रेमदेवलीवर्यया शान्तिमन्त्रेण कारितम्।

---

Editor in Chief

Dr.Sugyan Kumar Mahanty

To send news / informations / poetries in Sanskrit / Research Papers to this site please type in Arial Unicode MS(Devanagari) & email to prachiprajnaenb@gmail.com

---

Published by

**DR. SUGYAN KUMAR MAHANTY**

RASHTRIYA SANSKRIT SANSTHAN, VEADVYAS CAMPUS, BALAHAR, DIST. KANGRA,TEHSIL-RAKKAR, H.P. INDIA, PIN – 177108.

email - prachiprajnaenb@gmail.com

© The right of all the contents of this site is solely reserved to the Publisher.


संस्कृतवार्ता - prācī prajñā